दगदान्सुबहून्मम। चकार SkandP. i(2). 12. 39; SamarāSū. 33. 76; ĪśānS'iPa. i. 46. 94; AbhidhāCin. 473; यथापराधं दण्डयेषु दण्डं प्रायुङ्क्त नाभिभूः। व्याधितेषु यथा व्याधिचिकित्सक इवागदम् TrisaS'aPuC. i. 2. 978; PāndaC. 7. 393; अगदानि औषधानि VīraMi.(Rājanīti.) 161. 13; गजानां च हयानां च नराणामगदानि च NītiPra. 6. 50; **2** a charm (to be worn against poison) पार्थिवैर्दुर्गे…विचित्राश्चागदा धार्या विषस्य शमनास्तथा MatsyaP. 217. 84; रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा। अगदानि समाचक्ष्व MatsyaP. 218. 1; 219. 32; अगदैः संरक्षितः सदा तिष्ठेदित्युक्तम् VīraMi.(Rājanīti.) 164. 24; *n.* a branch of the science of Medicine dealing with antidotes अगदं विषतन्त्रं च भूतविद्या रसायनम्। … चिकित्सा चाष्टधा स्मृता HārīS. i. 2. 5; i. 2. 16; विषाणां यः प्रतीकारो विषतन्त्रं तदुच्यते। तदेवागदम् VīraMi. (Laksana.) 212. 24.

**अगदक्रम** (agada-krama) *m.* (proper) order of medical treatment तस्माद्योज्योऽगदक्रमः SuśruS. v. 5. 13.

**अगदगन्धहस्तिन्** (agada-gandhahastin) *m.* an antidote called *gandhahastin* गज इव तरून् विषगदान् निहन्त्यगदगन्धहस्त्येषः CaraS. vi. 23. 76 (1941 Ed.)

**अगदंकर** (agadankar-a) *adj.* curing a disease पद्मां समङ्गां मधुकम्…। पिबेत्तण्डुलतोयेन सक्षौद्रमगदङ्करम् SuśruS. vi. 40. 73; येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः। तेषु तत्कल्कसंलिप्तौ पाययेत्तु शिशुं स्तनौ BhāvPra.(Bhā.) 8(70 ? 71). 145; *m.* a physician अगदङ्करस्तु वैद्ये S'abdaRaSaK. 293. 6.

**अगदंकार** (agadankāra) *m.* a physician [ कारे सत्यागदस्य P. vi. 3. 70; अस्तुसत्यागदस्य कार उपसंख्यानम्…अगदंकारः MahāBh. iii. 167. 17 (*on* P. vi. 3. 70); CāndraVr. *on* v. 2. 77; KāśiVr. *on* vi. 3. 70; सत्यं करोतीति सत्यंकारः। एवमगदंकारः KātanVr. *on* iv. 1. 23; JaineVyā. 310. 20 (*on* iv. 3. 179); Prasā. i. 673. 3; SiddhāKau. 216A. 4 ] राजकुमार एवागदंकारो मन्मथज्वरापहरणे DaśKuC. 29. 21; न हि मिहिरमरीचिनिचयपचेलिमस्य तुहिनकरबिम्बसंवादादपरोऽपि कश्चिदगदंकारः कैरवाकरस्य AnarghaRā. 3. 57(9); समादिश अगदंकारमात्रेयम्। यथा देव्या अनङ्गसेनाया वपुषि सावधानेन भाव्यम् KaumuMi. 9. 0(6); सः…वैकृतं घोरघोरं तत्संजह्रे त्रिजगदगदंकारचारित्रमुद्रः S'rīKaC. 24. 38; 24. 7; नृपं द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः NaisC. 4. 116; अभूत्कश्चित्स भूपानां हृदि चित्राङ्गदोऽगदः। नागदो नागदङ्कारः कोऽप्यासाद्य चिकित्सते PāndaC. 1. 258; 8. 99; विश्वान्धंकरणस्य शश्वदगदङ्कारस्तमःसंचयव्याधेस्तारकवर्त्ममध्यमधुना धाम्नां पतिः प्राञ्चति MohaRāPa. 1. 35; (सः) गाढवेदनः। प्रत्याख्यातोऽगदङ्कारैर्विविक्षुर्ज्वलनेऽभवत् SamarāSaṁ. 6. 400; अगदङ्कारमादद्धं प्रज्ञामृतमनुत्तमम् Yādavā. 22. 22; तत्स्वास्थ्यमासादयितुं शक्ताः…। मन्मन्त्रिणोऽगदंकारा न सन्त्यद्यतने क्षणे RājTa.(S'rī.) 1(7). 112; एषः … साक्षादकृत…अगदंकार इति भवरुजातङ्कवाहिभिः…विभावितम्…त्रिपुरवैरिणम् YātrāPra. 3. 63(2); काये च तव कश्चन। गदश्चेदगदङ्कारैः सद्य एवापनोद्यते ParamāKā. 57. 14; रोगहार्यगदंकारः AmaK. 1187; ParyāMu. 23. 186; Vaija. 184. 143; AbhidhāCin. 472; ParyāS'aRa. 2. 122; रोगहार्यगदंकारभिषग्वैद्यचिकित्सकाः S'abdaRa.(Vā.) 2223; ParaNā. 1909; KośaKaTa. 1. 7411; KalpaK. 60. 363; S'abdaRaSaK. 36. 8; रोगहारोऽगदङ्कारः AstāNi. 38. 13.

**अगदंकार** (agadankār-a) *adj.* [*f.* -ā] [ Debru. p. 65 ] curing a disease, restoring health शारीराध्यात्मिकानां ज्वरातीसारादिसकलव्याधीनां सन्त्येवागदंकारा अष्टाङ्गायुर्वेदविदो भिषजः MāthVr. 4. 14 (*on* 1); दोर्भृतो यस्य कस्यापि शिरःशूलमुदेष्यति। गदेयमगदंकारा तस्य जागर्ति मामकी PāndaC. 4.284; अहंकारागदंकारौ(? रो) राजा प्रकृतिवृद्धये। दर्शनानां स धातूनामिवोल्लूनमशीशमत् RājTa.(Jo.) 998.

**अगदंकारचय** (agadankāra-caya) *m.* a group of physicians अगदंकारचयैरथाचिकित्स्ये। प्रबले सति हा भगंदराख्ये सरति स्म सरशासनं मुनीन्द्रः S'anka-DigVi.(Mā.) 16. 28.

**अगदंकारजन** (agadankāra-jana) *m.* a group of physicians एकादशस्थस्य गुरोः फलानि तदागदङ्कारजना लभन्ते Damaru. 34.

**अगदंकारदर्शन** (agadankāra-darśana) *adj.* whose sight or appearance cures diseases (i. e. a look at whom cures diseases) भवरोगार्तजन्तूनामगदङ्कारदर्शनः। निःश्रेयसश्रीरमणः श्रेयांसः श्रेयसेऽस्तु वः TrisaS'aPuC. i. 1. 13.

**अगदंकारनिभ** (agadankāra-nibha) *adj.* (acting) like a physician त्वत्तनयेऽर्प्यते स। गीर्मन्यकैः कैरपि दण्डसत्यंकारोऽगदंकारनिभे स्वपुत्राः DvyāśraKā. 6. 85; स्वयमुल्लाघयिता स एव नः।…अगदंकारनिभैरवेक्षणैः Yādavā. 9. 105.

**अगदंकारपुंगव** (agadankāra-pungava) *m.* an eminent physician अगदंकारपुंगवम्। सुहलम्…तं पुनः पुनरैक्षत S'rīKaC. 25. 99.

**अगदंकारशंकर** (agadankāra-śankara) *m.* a physician by name S'ankara अगदंकारशंकरो भट्टसूहकः। मन्त्रिणश्चान्तरङ्गाश्च…अभवन्प्रभोः RājTa. (Jo.) 728;821.

**अगदंकारिन्** (agadankār-in) *m.* a physician स लघुरगदंकारी केनापि कारणेन तं काचकुम्पकम्…बभञ्ज PrabaCin. 122. 5; वैद्यः श्रेष्ठोऽगदंकारी रोगहारी भिषग्विधः। …चिकित्सकः DhanvNi. 311. 10.

**अगदंकारोपयोग** (agadankāropayoga) *m.* administering of medicine आतुरस्यागदंकारोपयोग इवानिच्छतोऽपि जन्तोर्धर्मयोगः कुशलैः क्रियमाणो भवत्यायत्यामवश्यं निःश्रेयसाय YaśasCam. ii. 306. 7.

**अगदतन्त्र** (agada-tantra) *n.* one of the eight divisions of Medicine, discipline dealing with antidotes तद्यथा-शल्यं शालाक्यम्…अगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति SuśruS. i. 1. 7; अगदतन्त्रं नाम सर्पकीटलूतामूषकादिदष्टविषव्यञ्जनार्थं विविधविषसंयोगोपशमनार्थं च SuśruS. i. 1. 6; KāśyaS. 61B. 9; CaturCin. i. 893. 15.

**अगदता** (agada-tā) *f.* **A** the state of being or working as an antidote यद्यद् (? यद्वद्) योगवशाद्व्रजत्यगदतां द्रव्यैर्विषं योजितम् … । तद्वद्योगसमुद्भवं प्रकुरुते हित्वा ग्रहः स्वं फलम् YogYā. 4. 5; **B** healthy condition of the human body तेनागदतां व्रजति भवान्तरं वा AstāSaṁ. ii. 99. 7 (4. 17); तथा व्रजत्यगदतां शरीरान्तरमेव वा AstāHr. iv. 15. 81.

**अगदत्तरस** (aga-dattarasa) *adj.* [*f.* -ā] who is curious about the mountain निपतितमादाय … आर्तवमगोत्तमात् … । सस्पृहमगदत्तरसा पाञ्चाली भीममगदत्तरसा YudhiVi. 5. 10.

**अगदत्व** (agada-tva) *n.* state of having good health or not suffering from any disease रम्यागदत्वा शिवतनुः…मुनिजनम्…नयति…द्याम् ĪśvaS'. 68.

**अगदद्रव्य** (agada-dravya) *n.* medicine, drug, (especially) an antidote पार्थिवत्वाविशेषेऽपि विषं मरणकारणम्। अगदद्रव्यमन्यत्तु जीविताय प्रकल्पते NyāyMañ. ii. 57. 23.

**अगदधारण** (agada-dhārana) *n.* wearing a charm (on the body) ओषध्यगदधारणैः।…आगन्तुः प्रशमं याति CaraS. vi. 9. 93 (1941 Ed.)

**अगदप्रलिप्त** (agada-pralipta) *adj.* besmeared with medicine or drug (especially an antidote) भुञ्जानस्यास्य दुन्दुभीनगदप्रलिप्तान् वादयेत् AstāSaṁ. i. 45. 7 (1. 8)

**अगदमन्त्र** (agada-mantra) *m.* a spell which leads to freedom from sickness or which restores health स्यात्। विषघ्नागदमन्त्रधारी च VisnuSm. 3. 87.

**अगदमान्त्रिक** (agada-māntrika) *m.* one who knows the spells which work as antidote वीक्ष्य…कैटभारिकिरीटिनौ। ताम्यति स्माधिकं द्रौणिः फणीवागदमान्त्रिकैः PāndaC. 13. 566.

**अगदयत्** (agadayat) *adj.* making free from diseases त्वमयि वातनिकेतननाथ मामगदयन् कुरु तावकसेवकम् Nārāy. x. 40. 10.

**अगदराज** (agada-rāja) *m.* king of medicines (i. e. the best among medicines) नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः BhāgP. x. 47. 59.

**अगदर्शन** (agadarśana) *n.* name of a particular melody ततः सप्तस्वरं कार्यं सप्तरूपं च कौशिकी। अगदर्शनमित्याहुर्मानुद्रैममके तथा BrahmāndP. ii. 62. 36.

**अगदवेद** (agada-veda) *m.* the Veda related to the medicines i. e. the Āyurveda तस्मै जगादागदवेदसिन्धुप्रवर्तनाद्रिप्रवरोऽत्रिजस्तान् (श्वयथोः प्रकोपरूपप्रशमान्) CaraS. vi. 12. 4 (1941 Ed.)

**अगदश्रेष्ठ** (agada-śrestha) *adj.* the best of antidotes पीतोऽयमगदश्रेष्ठो हन्ति राजीमतो विषम् Hastyāyur. 184. 9 (2. 10)

**अगदसंकाश** (agada-sankāśa) *adj.* like medicine (i. e. acting like a medicine) स (ब्राह्मणः) एव हि यदा तुष्टो वचसा प्रतिनन्दति। भवत्यगदसंकाशः MahāBhā. xiii. 9. 18.

**अगदसत्कार** (agada-satkāra) *m.* administering of medicine स (ब्राह्मणः) एव हि यदा तुष्टो वचसा प्रतिनन्दति। भवत्यगदसंकाशः (v. l. °सत्कारः) MahāBhā. xiii. 9. 18.

**अगदादि** (agadādi) *adj.* antidotes and other (medicines) ओ(? औ)षधान्यगदादीनि…तपसैव प्रसिध्यन्ति MahāBhā. xiv. 50. 16; xii. 155. 4; medicines or other (beneficial things) YaśasCam. i. 276. 6; MāthVr. 5. 24 (*on* 1)

**अगदादिनिषेवण** (agadādi-nisevana) *n.* taking medicines or antidotes etc. चार्व्यां रुचौ तदुचिताचरणे च नृणां दृष्टार्थसिद्धिरगदादिनिषेवणेषु YaśasCam. i. 276. 6.

**अगदादिहेतु** (agadādi-hetu) *m.* the cause like administering medicine etc. एवमसौ दृष्टेनागदादिहेतुना, एकान्ततोऽवश्यम्, अत्यन्ततः सर्वथा, शरीरस्याध्यात्मिकदुःखस्य न प्रतीकारः MāthVr. 5. 24 (*on* 1)

**अगदापदेश** (agadāpadeśa) *m.* pretext or excuse of medicine चिकि-